# Shri Turiya Shodashi Trailokyavijayakavacham and Stotram

# શ્રીતુરીયાષોડશીત્રૈલોક્યવિજયકવચં સ્તોત્રમ્ ચ

## Document Information

Text title : turIyAShoDashItrailokyavijayakavachastotram

File name : turIyAShoDashItrailokyavijayakavachastotram.itx

Category : devii, dashamahAvidyA, kavacha, devI

Location : doc_devii

Transliterated by : Vandana Visweswariah Rudrapatna vandana.rv gmail.com

Proofread by : Vandana Visweswariah Rudrapatna, NA

Latest update : March 27, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 8, 2021

*sanskritdocuments.org*

# શ્રીતુરીયાષોડશીત્રૈલોક્યવિજયકવચં સ્તોત્રમ્ ચ

॥ શ્રીમહાત્રિપુરસુન્દર્યૈ નમઃ ॥

શ્રીતુરીયાષોડશીત્રૈલોક્યવિજયકવચસ્તોત્રસાધના

॥ પૂર્વપીઠિકા ॥

કૈલાસશિખરે રમ્યે દેવદેવં જગદ્ગુરુમ્ ।
શઙ્કરં પરિપપ્રચ્છ કુમારઃ શિખિવાહનઃ ॥ ૧॥

॥ શ્રીસ્કન્દ ઉવાચ ॥

જનક શ્રીગુરો દેવ પુત્રવાત્સલ્યવર્ધન! ।
કવચં ષોડશાક્ષર્યા વદ મે પરમેશ્વર!॥ ૨॥

॥ શ્રીઈશ્વર ઉવચ ॥

શ્ૃણુ પુત્ર મહાભાગ! કવચં મન્ત્રવિગ્રહમ્ ।
ગોપ્યાદ્ગોપ્યતરં ગોપ્યં ગુહ્યાદ્ગુહ્યતરં મહત્ ॥ ૩॥

તવ સ્નેહાત્ પ્રવક્ષ્યામિ નાખ્યાતં યસ્ય કસ્યચિત્ ।
બ્રહ્મેશવિષ્ણુશક્રેભ્યો મયા ન કથિતં પુરા ॥ ૪॥

દેવાગ્રે નૈવ દૈત્યાગ્રે ન શૌનકગુણાગ્રકે ।
તવ ભક્ત્યા તુ કવચં ગોપ્યં કર્તું ન શક્યતે ॥ ૫॥

એકાદશમહાવિદ્યા સવર્ણા સદ્ગુણાન્વિતા ।
સર્વશક્તિપ્રધાના હિ કવચં મન્મુખોદિતમ્ ॥ ૬॥

ગણેશશ્ચ રવિર્વિષ્ણુઃ શિવશક્તિશ્ચ ભૈરવઃ ।
પઞ્ચતત્ત્વાદિસર્વેષાં વર્માવર્તેન તુષ્યતામ્ ॥ ૭॥

ઊર્ધ્વામ્નાયં મહામન્ત્રં કવચં નિર્મિતં મયા ।
ત્રૈલોક્યવિજયં દિવ્યં તુરીયં કવચં શુભમ્ ॥ ૮॥

॥ શ્રીસ્કન્દ ઉવાચ ॥

કવચં પરમં દેવ્યાઃ શ્રોતુમિચ્છામ્યહં પ્રભો ।
યત્સૂચિતં ત્વયા પૂર્વં ધર્મકામાર્થમોક્ષદમ્ ॥ ૯॥

તદ્વિનાઽઽરાધનં નાસ્તિ જપં ધ્યાનાદિ કર્મણિ ।
તસ્યાશ્ચ કવચં યસ્માત્ તસ્માત્ તદ્વદ મે પ્રભો ॥ ૧૦॥

॥ શ્રીઈશ્વર ઉવાચ ॥

શ ૃણુ પુત્ર મહાપ્રાજ્ઞ ! રહસ્યાતિરહસ્યકમ્ ।
તુરીયં કવચં દિવ્યં સર્વમન્ત્રમયં શુભમ્ ॥ ૧૧॥

પૂજાન્તે તુ જપાત્પૂર્વં કવચં સમુદીરયેત્ ।
॥ વિનિયોગઃ ॥

અસ્ય શ્રીકવચસ્યાસ્ય ઋષિરાનન્દભૈરવઃ ॥ ૧૨॥

શ્રીવિદ્યા દેવતાશ્છન્દો ગાયત્રીરુચિવૃત્તિકમ્ ।
રમાબીજં પરાશક્તિઃ વાગ્ભવં કીલકં સ્મૃતમ્ ॥ ૧૩॥

મમ સર્વાર્થસિદ્ધ્યર્થે જપે તુ વિનિયોગતઃ ।
॥ કરન્યાસઃ ॥

અઙ્ગુષ્ઠાગ્રે વાગ્ભવં ચ હૃલ્લેખાં તર્જની ન્યસેત્ ॥ ૧૪॥

લક્ષ્મીબીજં મધ્યમાયામઙ્ગિરાઽનામિકા તથા ।
પરાબીજં કનિષ્ઠાયાં લક્ષ્મીં કરતલે ન્યસેત્ ॥ ૧૫॥

॥ ષડઙ્ગન્યાસઃ ॥

હૃદયે વાગ્ભવં ન્યસ્યાત્ પરાં શિરસિ ચ ન્યસેત્ ।
લક્ષ્મીબીજં શિખાયાં ચ કવચે વાગ્ભવં ન્યસેત્ ॥ ૧૬॥

હૃલ્લેખાં નેત્રયોર્ન્યસ્યાદસ્ત્રં તુ કમલાં ન્યસેત્ ।
॥ દિગ્બન્ધનમ્ ॥

ભૂર્ભુવઃ સ્વરિતિ મનુના દિગ્બન્ધનમાચરેત્ ॥ ૧૭॥

ધ્યાનં તસ્ય પ્રવક્ષ્યામિ ધર્મકામાર્થમોક્ષદમ્ ।
ન્યાસધ્યાનાદિકં સર્વં કૃત્વા તુ કવચં પઠેત્ ॥ ૧૮॥

॥ ધ્યાનમ્ ॥

ક્ષીરસાગરમધ્યસ્થે રત્નદ્વીપે મનોહરે ।
રત્નસિંહાસને દિવ્યે તત્ર દેવીં વિચિન્તયેત્ ॥ ૧૯॥

કોટિસૂર્યપ્રતીકાશાં ચન્દ્રકોટિનિભાનનામ્ ।
દાડિમીપુષ્પસઙ્કાશાં કુઙ્કુમોદરસન્નિભામ્ ॥ ૨૦॥

જપાકુસુમસઙ્કાશાં ત્રિનેત્રાં ચ ચતુર્ભુજામ્ ।
પાશાઙ્કુશધરાં રમ્યામિક્ષુચાપશરાન્વિતામ્ ॥ ૨૧॥

કર્પૂરશકલોન્મિશ્રતામ્બૂલપૂરિતાનનામ્ ।
સર્વશ ૃઙ્ગાર વેષાઢ્યાં સર્વાવયવશોભિનીમ્ ॥ ૨૨॥

સર્વાયુધસમાયુક્તાં પ્રસન્નવદને ક્ષણામ્ ।
સપરિવારસાવરણાં સર્વોપચારાર્ચિતામ્ ॥ ૨૩॥

એવં ધ્યાયેત્ તતો વીર ! કવચં સર્વકામદમ્ ।
આવર્તયેત્ સ્વદેહે તુ સર્વરક્ષાકરં શુભમ્ ॥ ૨૪॥

॥ અથ કવચપાઠઃ ॥

શિખાયાં મે "હ્સૌઃ" "પાતુ" "શૌ" મે પાતુ બ્રહ્મરન્ધ્રકે ।
સર્વદા "હ્લૌં" ચ માં પાતુ વામદક્ષિણભાગયોઃ ॥ ૧॥

"ઐં હ્રીં શ્રીં" સર્વદા પાતુ ષોડશી સુન્દરી પરા ।
"શ્રીં હ્રીં ક્લીં" સર્વદા પાતુ "ઐં સૌં ૐ" પાતુ મે સદા ॥ ૨॥

"હ્રીં શ્રીં ઐં" પાતુ સર્વત્ર "ક્નૌં રં લં હ્રીં" સદા મમ ।
"ક્લીં હસકહલહ્રીં" મે પાતુ સદા "સૌઃ ક્લીં" મમ ॥ ૩॥

"સૌઃ ઐં ક્લીં હ્રીં" શ્રિયા પાતુ સબીજા ષોડશાક્ષરી ।
આપાદમસ્તકં પાતુ મહાત્રિપુરસુન્દરી ॥ ૪॥

શ્રીજયન્તી મસ્તકે માં પાતુ નિત્યં વિભૂતયે ।
"હ્રીં" મઙ્ગલા સદા નેત્રે પાતુ સર્વાર્થસિદ્ધયે ॥ ૫॥

"ક્લીં" કાલિકા કર્ણયુગ્મં પાતુ સર્વશુભાવહા ।
"ઐં" ભારતી ઘ્રાણયુગ્મં પાતુ સર્વજયાપ્તયે ॥ ૬॥

"સૌઃ" કરાલી મુખં પાતુ સર્વલોકવશાપ્તયે ।
"ઐં" શારદા સદા વાચં પાતુ સાહિત્યસિદ્ધયે ॥ ૭॥

"ૐ" કપાલિની મે કર્ણૌ પાતુ સદ્ગાનસિદ્ધયે ।
"હ્રીં" દુર્ગા સહિતા પાતુ સ્કન્ધદેશૌ સદા મમ ॥ ૮॥

"શ્રીં" ક્ષમસહિતા પાતુ હૃદયં મમ સર્વદા ।
"કકાર"સહિતા ધાત્રી પાર્શ્વયુગ્મં સદાઽવતુ ॥ ૯॥

"એકાર"સહિતા સ્વાહા પાતુ મે જઠરં સદા ।
"ઈકાર"સહિતા નાભિં સ્વધા માં સર્વદાઽવતુ ॥ ૧૦॥

"લકાર"સહિતા બ્રાહ્મી પૃષ્ઠદેશં સદાઽવતુ ।
"હ્રીઙ્કાર"સહમાહેશી કટિં પાતુ સદા મમ ॥ ૧૧॥

"હકાર"સહિતા ગુહ્યં કૌમારી પાતુ સર્વદા ।
"સકાર"સહિતા પાતુ વૈષ્ણવી ગુદદેશકમ્ ॥ ૧૨॥

"કકાર"યુક્તાવારાહી હ્યૂરુયુગ્મં સદાઽવતુ ।
"હકાર"સહિતા જાનુયુગ્મં માહેન્દ્રી મેઽવતુ ॥ ૧૩॥

"લકાર"યુક્તા ચામુણ્ડા જઙ્ઘાયુગ્મં સદાઽવતુ ।
"હ્રીઙ્કાર"સહિતા ગુલ્ફયુગ્મં લક્ષ્મીઃ સદાઽવતુ ॥ ૧૪॥

"સકાર"યુક્તા મે પાદયુગ્મેઽવ્યાત્ શિવદૂતિકા ।
"કકાર"સહિતા પ્રાચ્યાં ચણ્ડા રક્ષતુ સર્વદા ॥ ૧૫॥

"લકાર"સહિતાઽઽગ્નેયાં પ્રચણ્ડા સર્વદાઽવતુ ।
"હ્રીઙ્કાર"સહિતા પાતુ દક્ષિણે ચણ્ડનાયિકા ॥ ૧૬॥

"સૌઃકાર"સહિતા ચણ્ડવેગિની નૈરૃતેઽવતુ ।
"ઐઙ્કાર"સંયુતા ચણ્ડપ્રકાશા પાતુ પશ્ચિમે ॥ ૧૭॥

"ક્લીઙ્કાર"સહિતા પાતુ ચણ્ડિકા વાયુગોચરે ।
"હ્રીઙ્કાર"સહિતા પાતુ ચામુણ્ડા ચોત્તરે મમ ॥ ૧૮॥

"શ્રીઙ્કાર"સહિતા રૌદ્રી પાયાદૈશાન્યકે મમ ।
"ઊર્ધ્વં" બ્રહ્માણી મે રક્ષેત્ ષોડશીસહ સર્વદા ॥ ૧૯॥

અધસ્તાદ્વૈષ્ણવી રક્ષેત્ પુનઃ ષોડશીસંયુતા ।
સર્વાઙ્ગં સર્વદા પાતુ સહિતા ભુવનેશ્વરી ॥ ૨૦॥

જલે દાવાનલેઽરણ્યે મહોત્પાતે ચ સાગરે ।

દિવારાત્રૌ ચ મે રક્ષેદ્ દેવી તારત્રયી મમ ॥ ૨૧॥

॥ ફલશ્રુતિ ॥

ઇદં તુરીયાસહિતં ષોડશાક્ષરિકાત્મકમ્ ।
અભેદ્યં કવચં ત્વેદં મન્ત્રબીજસમન્વિતમ્ ॥ ૧॥

યોગિનીચક્રસહિતં તવ પ્રીત્યા પ્રકાશિતમ્ ।
ધારયસ્વ મયા દત્તં ગોપનીયં સુપુત્રક ॥ ૨॥

ન પુત્રાય ન શિષ્યાય બન્ધુભ્યો ન પ્રકાશયેત્ ।
ઇદં ત્રિપુરસુન્દર્યાસ્તુરીયં કવચં શુભમ્ ॥ ૩॥

ગોપનીયં પ્રયત્નેન મન્ત્રવર્ણક્રમોદિતમ્ ।
પ્રાતરારભ્ય સાયાન્તં કર્મવેદાન્તમૌક્તિકમ્ ॥ ૪॥

તત્ફલં સમવાપ્નોતિ તુરીયકવચવ્રતમ્ ।
દશધા માતૃકાન્યાસં લઘુષોઢા તતઃ પરમ્ ॥ ૫॥

શક્તિન્યાસં મહાષોઢાં કૃત્વા બાહ્યાન્તરં ન્યસેત્ ।
શ્રીવિદ્યાયાં મહાન્યાસં ક્રમાત્ સાવર્ણતાં વ્રજેત્ ॥ ૬॥

પૂજાન્તે યત્ફલં પ્રાપ્તં તત્ફલં કવચવ્રતે ।
સવત્સાં દુગ્ધસહિતાં સાધકઃ કામધેનુવત્ ॥ ૭॥

ત્રૈલોક્યવિજયાયેદં કવચં પરમાદ્ભુતમ્ ।
યથા ચિન્તામણૌ પુત્ર ! મનસા પરિકલ્પિતે ॥ ૮॥

તત્સર્વં લભતે શીઘ્રં મમ વાક્યાન્ન સંશયઃ ।
સાયુરારોગ્યમૈશ્વર્યં સદા સમ્પત્પ્રવર્ધનમ્ ॥ ૯॥

કવચસ્ય પ્રભાવેણ ત્રૈલોક્યવિજયી ભવેત્ ।
અદીક્ષિતાય ન દેયં શ્રદ્ધાવિરહિતાત્મને ॥ ૧૦॥

નાખ્યેયં યસ્ય કસ્યાપિ કૃતઘ્નાયાતતાયિને ।
શાન્તાય ગુરુભક્તાય દેયં શુદ્ધાય સાધને ॥ ૧૧॥

અજ્ઞાત્વા કવચં ચેદં યો જપેત્ પરદેવતામ્ ।
સિદ્ધિર્ન જાયતે વત્સ ! કલ્પકોટિશતૈરપિ ॥ ૧૨॥

સ એવ ચ ગુરુ સાક્ષાત્ કવચં યસ્તુ પુત્રક ।

ત્રિસન્ધ્યં ચ પઠેન્નિત્યમિદં કવચમુત્તમમ્ ॥ ૧૩॥

નિશાર્ધે જપકાલે વા પ્રત્યહં યન્ત્રમગ્રતઃ ।
જગદ્વશ્યં ભવેચ્છીઘ્રં નાત્ર કાર્યા વિચારણા ॥ ૧૪॥

સપ્તકોટિમહામન્ત્રાઃ સવર્ણાઃ સગુણાન્વિતાઃ ।
સર્વે પ્રસન્નતાં યાન્તિ સત્યં સત્યં ન સંશયઃ ॥ ૧૫॥

ઇતિ તે કથિતં દિવ્યં સગુણે ભજનક્રમમ્ ।
નિર્ગુણં પરમં વક્ષ્યે તુરીયં કવચં શૃણુ ॥ ૧૬॥

કવચસ્યાસ્ય માહાત્મ્યં વર્ણિતું નૈવ શક્યતે ।
મૂલાદિબ્રહ્મરન્ધ્રાન્તં શ્રીચક્રં સમુદીરયેત્ ॥ ૧૭॥

દેહમધ્યે ચ સર્વસ્વં શ્રીચક્રં ચિન્તયેત્ સુત ।
પઞ્ચવિંશતિતત્ત્વં ચ અતલં વિતલં તથા ॥ ૧૮॥

સુતલં ચ તલાતલં મહાતલં ચ પઞ્ચમમ્ ।
રસાતલં ષષ્ઠં વક્ષ્યે સપ્તમં પાતાલલોકમ્ ॥ ૧૯॥

ભૂર્ભુવઃ સ્વર્લોકમતો મહલ્લોકજનસ્તથા ।
તપશ્ચ સત્યલોકશ્ચ ભુવનાનિ ચતુર્દશ ॥ ૨૦॥

સર્વં શ્રીભુવનં ચૈવ નિરાકારં વિચિન્તયેત્ ।
માનસે પૂજયેત્ ધ્યાયેજ્જ્યોતિરૂપં સુચિન્મયમ્ ।
કવચં પ્રજપેદ્ વત્સ ! રાજરાજેશ્વરો ભવેત્ ॥ ૨૧॥

ઇતિ પરમરહસ્યં સર્વમન્ત્રાર્થસારં
    ભજતિ પરમભક્ત્યા નિશ્ચલં નિર્મલત્વમ્ ।
વિલસિત ભુવિ મધ્યે પુત્રપૌત્રાભિવૃધ્દિં
    ધનસકલસમૃધ્દિં ભોગમોક્ષપ્રદં ચ ॥ ૨૨॥

॥ ઇતિ શ્રીચૂડામણૌ શ્રીશિવસ્કન્દસંવાદે ત્રૈલોક્યવિજયં નામ
શ્રીતુરીયાષોડશી શ્રીરાજરાજેશ્વરી મહાત્રિપુરસુન્દરીકવચં સમ્પૂર્ણમ્ ॥

ભગવતી ષોડશી કી આરાધના

તવ યુગચરણોં કી પૂજા કરને સે ત્રિગુણજનિત અવિલમ્બ-
તીનોં દેવોં કી પૂજા ભી, હો જાતી હૈ પુરી અમ્બ!
ક્યોંકિ નિકટ મણિપીઠ મંજુ જો ધારણ કરતા ચરણ ત્વદીય

સદા ખડ઼ે રહતે યે જોડ઼ે, નિજ મુકુટોં પર કર કમનીય ॥

હે શિવે ! તુમ્હારે ચરણયુગલ કી પૂજા હી સત્ત્વ, રજ ઔર તમોગુણોં સે
સૃષ્ટ તીનોં દેવોં કી પૂજા હૈ ક્યોંકિ યે ઉચ્ચ મુકુટવાલે (દેવ) હાથ
જોડ઼ે તુમ્હારે પાઁવ રખને કી મણિયોં કી બની ચૌકિ કે સમીપ ખડ઼ે હૈં ।

॥ શ્રીમહાત્રિપુરસુન્દરી કો નમસ્કાર ॥

શ્રીતુરીયાષોડશીત્રૈલોક્યવિજયકવચસાધના હિન્દીરૂપાન્તર
॥ પૂર્વપીઠિકા ॥

સુરમ્ય કૈલાસ પર્વત પર દેવાધિદેવ જગદ્ગુરુ શઙ્કર સે મયૂરવાહન
કુમાર (કાર્ત્તિકેય યા સ્કન્દ) ને પૂછા ॥ ૧॥

શ્રીસ્કન્દ ને કહા - હે પિતાજી, શ્રીગુરુદેવ! આપ પુત્રપ્રેમ બઢ઼ાનેવાલે
હૈં । હે પરમેશ્વર! ષોડશાક્ષરી (વિદ્યા કા) કવચ કહિએ ॥ ૨॥

શ્રીશિવ જી ને કહા - હે પુત્ર! મન્ત્ર-વિગ્રહાત્મક યહ કવચ
ગુપ્ત-સે-ગુપ્ત હૈ ॥ ૩॥

તુમ્હારે પ્રતિ સ્નેહ સે કહતા હૂઁ । જિસતિસ સે નહીં કહા ગયા હૈ ।
બ્રહ્મા, ઈશ, વિષ્ણુ ઔર ઇન્દ્ર સે ભી નહીં કહા ગયા હૈ ॥ ૪॥

ન તો દૈત્યોં, ન દેવતાઓં ઔર ન હી શૌનકાદિ સે કહા હૈ, કિન્તુ
તુમ્હારી ભક્તી-વશ ઇસ કવચ કો ગુપ્ત રખને મેં સમર્થ નહિં હૂઁ ॥ ૫॥

સવર્ણા ઔર સદ-ગુણોં સે યુક્ત એકાદશ મહાવિદ્યાઓં મેં પ્રધાન યહ
કવચ મેરે દ્વારા કહા ગયાં હૈ ॥ ૬॥

ગણેશ, સૂર્ય, વિષ્ણુ, શિવ-શક્તિ ભૈરવ ઔર સભી પાઁચોં તત્ત્વ
કવચ કે આવર્તન (સતત-પાઠ) સે સન્તુષ્ટ હોતે હૈં ॥ ૭॥

ત્રૈલોક્ય-વિજય-દાયક યહ તુરીય કવચ (યહાઁ તુરીય શબ્દ
સંખ્યાવાચક ન હોકર વિશેષણ કે રૂપ મેં હૈ) ઊર્ધ્વામ્નાય કે
મહામન્ત્રોં સે મેરે દ્વરા નિર્મિત હૈ ॥ ૮॥

શ્રીસ્કન્દ ને કહા - ધર્મ, અર્થ, કામ ઔર મોક્ષ દેનેવાલી દેવી કા
શ્રેષ્ઠ કવચ જો આપને પહલે સૂચિત કિયા હૈ, મૈં સુનના ચાહતા
હૂઁ ॥ ૯॥

જિસકે બિના આરાધના, જપ ઔર ધ્યાનાદિ કર્મ નહીં હોતે, વહ કવચ

હે પ્રભો! જૈસે ભી હો, મુઝસે કહિએ ॥ ૧૦॥

શ્રીઈશ્વર ને કહા - હે મહા-પ્રજ્ઞાવાન્ પુત્ર !યહ દિવ્ય તુરીય કવચ
અત્યન્ત શુભ ઔર સભી મન્ત્રોં સે યુક્ત, રહસ્ય કા ભી રહસ્ય (અત્યન્ત
રહસ્ય-મય) હૈ ॥ ૧૧॥

પૂજન કે અન્ત મેં જપ કે પૂર્વ કવચ પઢના ચાહિએ । ઇસ કવચ કે
ઋષિ આનન્દ-ભૈરવ હૈં ॥ ૧૨॥

ગાયત્રી છન્દ હૈ ઔર શ્રી શ્રીવિદ્યા ઇસકી દેવતા હૈં । “રમા”
(શ્રીં) ઇસકા બીજ હૈ, “પરા” (હ્રીં) બીજ ઇસકી શક્તિ ઔર
“વાગ્ભવ” (ઐં) બીજ કીલક હૈ ॥ ૧૩॥

સર્વાર્થ-સિધ્દિ કે લિએ ઇસકા વિનિયોગ હૈ । અંગુષ્ઠ મેં
“વાગ્ભવ” (ઐં) તથા તર્જની મેં “હૃલ્લેખા” (હ્રીં)
કા ન્યાસ કરે ॥ ૧૪॥

“લક્ષ્મી-બીજ” (શ્રીં) કા મધ્યમા મેં, અઙ્ગિરા (ઐં) બીજ
કા અનામિકા મેં, “પરા-બીજ” (હ્રીં) કા કનિશ્ઠિકા મેં ઔર
“લક્ષ્મી” (શ્રીં) કા કરતલ મેં ન્યાસ કરે ॥ ૧૫॥

હૃદય મેં “વાગ્ભવ” (ઐં), શિર મેં “પરા” (હ્રીં)
શિખા મેં “લક્ષ્મી” (શ્રીં), કવચ મેં વાગ્ભવ (ઐં),
નેત્રોં મેં “હૃલ્લેખા” (હ્રીં) ઔર અસ્ત્ર મેં “કમલા”
(શ્રીં) કા ન્યાસ કરે । “ભૂર્ભુવઃ સ્વઃ” સે દિગ્-બન્ધન કરે ।
ન્યાસ, ધ્યાન આદિ કરકે હી કવચ કા પાઠ કરના ચાહિએ । ધર્મ, અર્થ,
કામ ઔર મોક્ષ-દાયક ધ્યાન કહતા હૂઁ ॥ ૧૬-૧૮॥

ક્ષીર-સાગર કે મધ્ય મેં મનોહર રત્ન-દ્વીપ મેં સ્થિત રત્ન-સિંહાસન
પર દેવી કા ચિન્તન (ધ્યાન) કરે ॥ ૧૯॥

વે કરોડ઼ોં સૂર્યોં કે સમાન પ્રકાશમાન હૈં । કરોડ઼ોં ચન્દ્રમાઓં
કે સમાન ઉનકા મુખ-મણ્ડલ હૈ, વે દાડિમ (અનાર) પુષ્પ ઔર કુંકુમ
કે સમાન રઙ્ગ કી આભા સે યુક્ત હૈં ॥ ૨૦॥

જપા-કુસુમ (જાસૌન) કે સમાન ઉનકે તીન નેત્ર હૈં । પાશ, અંકુશ,
ઇક્ષુ-ચાપ (ગન્ને સે બના ધનુષ) ઔર બાણોં સે યુક્ત ચાર ભુજાએઁ
હૈં ॥ ૨૧॥

કપૂર આદિ સે સુવાસિત તામ્બૂલ સે ઉનકા મુખ ભરા હૈ । સબ પ્રકાર કે શૃઙ્ગાર સે યુક્ત ઉનકે સભી અવયવ (અઙ્ગ) અત્યન્ત સુન્દર હૈં ॥ ૨૨॥

વે સભી આયુધોં સે યુક્ત હૈં, પૂરે પરિવાર ઔર આવરણ-દેવતાઓં સે યુક્ત હૈં । પ્રસન્નતા ઉનકે શરીર ઔર આઁખોં સે ઝલકતી હૈ ॥ ૨૩॥

હે વીર! ઇસ પ્રકાર ધ્યાન કરકે  સમસ્ત કામનાઓં કે દાતા ઔર સબ પ્રકાર સે રક્ષા કરનેવાલે શુભ કવચ સે અપની દેહ કો ઢાઁકે (રક્ષા કરે)॥ ૨૪॥

॥ કવચ-સ્તોત્ર-પાઠ ॥

મેરી શિખા કી રક્ષા "હ્સૌઃ" ઔર બ્રહ્મ-રન્ધ્ર કી રક્ષા
"શૌ" કરેં । મેરે બાઁએઁ ઔર દાહિને ભાગ કી રક્ષા સદા
"હ્લૌં" કરેં ॥ ૧॥

"ઐં હ્રીં શ્રીં" ષોડશી સુન્દરી પરા સદા રક્ષા કરેં ।
"શ્રીં હ્રીં ક્લીં" સર્વદા રક્ષા કરેં, "ઐં સૌઃ ૐ"
સદા મેરી રક્ષા કરેં ॥ ૨॥

"હ્રીં શ્રીં ઐં" સબ જગહ ઔર "ક્નૌં રં લં
હ્રીં" સદા મેરી રક્ષા કરેં । "ક્લીં હ-સ-ક-લ-હ્રીં"
ઔર "સૌઃ ક્લીં" સદા મેરી રક્ષા કરેં ॥ ૩॥

"સૌઃ ઐં ક્લીં હ્રીં" બીજ-યુક્ત ષોડશાક્ષરી લક્ષ્મી
મેરી રક્ષા કરેં । આપાદ-મસ્તક (સિર સે પૈરોં તક) મહા-ત્રિપુર-સુન્દરી
રક્ષા કરેં ॥ ૪॥

સદા વિભૂતિ કે લિએ શ્રીજયન્તી મેરે મસ્તક કી રક્ષા કરેં ।
સર્વાર્થ-સિદ્ધિ કે લિએ "હ્રીં" મઙ્ગલા સદા મેરે નેત્રોં કી
રક્ષા કરેં ॥ ૫॥

સર્વ-શુભાવહા "ક્લીં" કાલિકા દોનોં કાનોં કી રક્ષા કરેં ।
સર્વ-વિધ જય-પ્રાપ્તિ કે લિએ "ઐં" ભારતી ઘ્રાણ-યુગ્મ
(નાસા-પુટ-દ્વય) કી રક્ષા કરેં ॥ ૬॥

સર્વ-લોક-વશીકરણ કે લિએ "સૌઃ" કરાલી મુખ કી રક્ષા કરેં ।
સાહિત્ય-સિદ્ધિ કે લિએ "ઐં" શારદા સદા વાચા (વાણી) કી રક્ષા
કરેં ॥ ૭॥

સદ્-ગાયન કી સિદ્ધિ કે લિએ “ૐ” કપાલિની મેરે કાનોં કી રક્ષા
કરેં । દુર્ગા કે સાથ “હ્રીં” મેરે સ્કન્ધ “કન્ધે”
કી સદા રક્ષા કરેં ॥ ૮॥

ક્ષમા-સહિત “શ્રીં” સર્વદા મેરે હૃદય કી રક્ષા કરેં ।
કકાર-સહિત ધાત્રી  મેરે દોનોં પાર્શ્વોં કી રક્ષા કરેં ॥ ૯॥

એકાર-સહિત “સ્વાહા” મેરે જઠર (પેટ) કી રક્ષા કરેં ।
ઈકાર-સહિત “સ્વધા” સર્વદા મેરી નાભી કી રક્ષા કરેં ॥ ૧૦॥

લકાર-સહિત બ્રાહ્મી સદા પૃષ્ઠ-દેશ કી રક્ષા કરેં ।
“હ્રીં” કાર-સહિત માહેશી સદા મેરી કમર કી રક્ષા કરેં ॥ ૧૧॥

હકાર-સહિત કૌમારી સર્વદા ગુહ્ય-સ્થાન કી રક્ષા કરેં । સકાર-સહિત
વૈષ્ણવી ગુદ-દેશ કી રક્ષા કરેં ॥ ૧૨॥

કકાર-સહિત વારાહી સદા ઉરુ-દ્વય કી રક્ષા કરેં । હકાર-સહિત માહેન્દ્રી
જાનુ-દ્વય કી રક્ષા કરેં ॥ ૧૩॥

લકાર-સહિત ચામુણ્ડા દોનોં જંઘાઓ કી સદા રક્ષા કરેં । હ્રીંકાર-સહિત
લક્ષ્મી (મહા-લક્ષ્મી) ગુલ્ફ-દ્વય કી રક્ષા કરેં ॥ ૧૪॥

સકાર-સહિત શિવ-દૂતી દોનોં પૈરોં કી રક્ષા કરેં । કકાર-સહિત
ચણ્ડા સદા પૂર્વ દિશા મેં રક્ષા કરેં ॥ ૧૫॥

લકાર-સહિત પ્રચણ્ડા સર્વદા આગ્નેય દિશા મેં રક્ષા કરેં ।
હ્રીંકાર-સહિત ચણ્ડ-નયિકા દક્ષિણ દિશા મેં રક્ષા કરેં ॥ ૧૬॥

સૌઃ-કાર-સહિત ચણ્ડ-વેગિની નૈરૃત્ય દિશા મેં રક્ષા કરેં ।
ઐંકાર-સહિત ચણ્ડ-પ્રકાશા પશ્ચિમ દિશા મેં રક્ષા કરેં ॥ ૧૭॥

ક્લીંકાર-સહિત ચણ્ડિકા વાયવ્ય દિશા મેં રક્ષા કરેં । હ્રીંકાર-સહિત
ચામુણ્ડ઼ા ઉત્તર-દિશા મેં રક્ષા કરેં ॥ ૧૮॥

શ્રીંકાર-સહિત રૌદ્રી ઈશાન-દિશા મેં મેરી રક્ષા કરેં । ષોડશી કે
સાથ બ્રહ્માણી ઊર્ધ્વ -દિશા મેં રક્ષા કરેં ॥ ૧૯॥

ષોડશીકે સાથ વૈષ્ણવી અધો-દિશા મેં રક્ષા કરેં । સર્વાઙ્ગ કી
સર્વદા રક્ષ ષોડશી-સહિત ભુવનેશ્વરી કરેં ॥ ૨૦॥

જલ મેં, દાવાનલ મેં, જઙ્ગલ મેં, મહોત્પાત મેં, સમુદ્ર મેં
દિન-રાત તાર-ત્રયી મેં ("ઐં હ્રીં શ્રીં"-સ્વરૂપા)
દેવી મેરી રક્ષા કરેં ॥ ૨૧॥

॥ ફલ-શ્રુતિ ॥

યહ તુરીયા-કવચ ષોડશાક્ષર-મન્ત્ર કે બીજોં સે નિર્મિત ઔર અભેદ્ય
હૈ ॥ ૧॥

યોગિની-ચક્ર-સહિત ઇસે તુમ્હારી પ્રીતિ-વશ પ્રકાશિત કિયા હૈ । હે
સુપુત્ર! મેરે દ્વારા દિએ ગએ ઇસ ગોપનીય કવચ કો ધારણ કરો ॥ ૨॥

શ્રીત્રિપુર-સુન્દરી કા યહ તુરીય-કવચ પુત્ર, શિષ્ય ઔર બન્ધુ આદિ
કો ભી નહીં બતાના ચાહિએ ॥ ૩॥

મન્ત્ર-વર્ણોં કે ક્રમ મેં કહા ગયા યહ કવચ પ્રયત્ન-પૂર્વક ગુપ્ત
રખે । પ્રાતઃ-કાલ સે સન્ધ્યા-કાલ તક કે કર્મ વૈદિક કહે ગએ હૈં ॥ ૪॥

ઇનકે સમાન ફલ તુરીય-કવચ કે વ્રત સે મિલતા હૈ । દસ પ્રકાર કે
માતૃકા-ન્યાસ લઘુ-ષોઢા-ન્યાસ ॥ ૫॥

શક્તિ-ન્યાસ તથા મહા-ષોઢા-ન્યાસ બાહ્યા ઔર અન્તર મેં કરે ।
શ્રીશ્રીવિદ્યા કે મહા-ન્યાસ સે ક્રમાનુસાર સાવર્ણતા મિલતી હૈ ॥ ૬॥

ઇન ન્યાસોં-સહિત પૂજન સે જો ફલ મિલતા હૈ, વહ કવચ-વ્રત (પાઠ)
સે હી મિલ જાતા હૈ । સાધક બછડે ઔર દુગ્ધ-દાયી કામ-ધેનુ કે સમાન
હો જાતા હૈ ॥ ૭॥

યહ ત્રૈલોક્ય-વિજય કવચ પરમ અદ્ભુત હૈ । જિસ પ્રકાર હે
પુત્ર! મન-ચાહી વસ્તુ સોચતે હી ચિન્તા-મણિ ઉસે પ્રદાન કરતી હૈ ॥ ૮॥

ઉસી પ્રકાર ઇસસે ભી શીઘ્ર હી કામના-પૂર્તિ હોતી હૈ યહ મેરા કથન
સંશય-હીન હૈ । આયુ, ઐશ્વર્ય ઔર સદા સમ્પત્તિ કી વૃદ્ધિ કે સાથ,
કવચ કે પ્રભાવ સે સાધક ત્રિલોક્ય-વિજયી હોતા હૈ । અદીક્ષિત ઔર
શ્રદ્ધા સે હીન મનવાલે વ્યક્તિ કો યહ કવચ નહીં દેના ચાહિએ ॥ ૯-૧૦॥

ન હી કૃતઘ્ન ઔર આત-તાયી (અત્યાચારી) આદિ જિસ-તિસ સે ઇસે કહના ચાહિએ ।
શાન્ત, ગુરુ-ભક્ત, શુદ્ધ ઔર સાધુ કો હી દેના ચાહિએ ॥ ૧૧॥

ઇસ કવચ કો બિના જાને જો પર-દેવતા કા મન્ત્ર જપતા હૈ, ઉસે હે

વત્સ! સૈકડોં કરોડ કલ્પોં મેં ભી સિદ્ધિ નહિં મિલતી ॥ ૧૨॥

હે પુત્ર! જો તીનોં સન્ધ્યાઓં મેં ઇસ ઉત્તમ કવચ કા નિત્ય પાઠ કરતા
હૈ, વહ સાક્ષાત્ ગુરુ હૈ ॥ ૧૩॥

અર્ધ-રાત્રિ મેં, જપ-કાલ મેં, પ્રતિ-દિન યન્ત્ર-રાજ કે આગે જો ઇસકા
પાઠ કરતા હૈ, વહ સારે સંસાર કો શીઘ્ર હી વશ મેં કર લેતા હૈ,
ઇસમેં સંશય નહીં ॥ ૧૪॥

ઉત્તમ વર્ણ ઔર ગુણોં સે યુક્ત સાત કરોડ઼ મહા-મન્ત્ર (ઇસકે પાઠ સે)
પ્રસન્ન હો જાતે હૈં । યહ સત્ય હૈ, ઇસમેં સંશય નહીં ॥ ૧૫॥

કવચ કા યહ સગુણ ભજન-ક્રમ હૈ । અબ ઇસકા નિર્ગુણ-ક્રમ સુનોં- ॥

૧૬॥

ઇસ કવચ કા માહાત્મ્ય વર્ણિત કરને મેં મૈં સમર્થ નહીં હૂઁ ।
મૂલાધાર સે બ્રહ્મ-રન્ધ્ર તક શ્રીચક્ર કહા ગયા હૈ અર્થાત્, મૂલાધાર
સે બ્રહ્મ-રન્ધ્ર પર્યન્ત કરે ॥ ૧૭॥

શરીર કે મધ્ય મેં સમસ્ત શ્રીચક્ર કા ચિન્તન કરે । પચ્ચીસ તત્ત્વોં
તથા અતલ, વીતલ, સુતલ, તલાતલ, મહા-તલ, રસાતલ ઔર સાતવાઁ
પાતાલ-લોક ॥ ૧૮-૧૯॥

ભૂઃ, ભુવઃ, સ્વઃ, મહઃ, જનઃ, તપઃ ઔર સત્ય-લોક-યે ચૌદહ
ભુવન ॥ ૨૦॥

ઇન સભી કે સાથ શ્રીભુવન કો ભી નિરાકાર ધ્યાન કરકે
ચિન્મય-જ્યોતિ-સ્વરૂપિણી દેવતા કા માનસિક પૂજન કરકે કવચ કા પાઠ
કર્તા હે વત્સ ! રાજ-રાજેશ્વર હોતા હૈ ॥ ૨૧॥

યહ સભી મન્ત્રોં કા સાર પરમ રહસ્ય-મય હૈ । જો પરમ ભક્તિ સે
નિશ્ચલ (દૃઢ઼) ઔર નિર્મલ મન સે ઇસ (કવચ) કા ભજન કરતા
હૈ, વહ ઇસ લોક મેં પુત્ર-પૌત્રાદિ કી વૃદ્ધિ, સભી પ્રકાર
કી ધન-સમ્પત્તિ-યુક્ત પાકર ક્રીડ઼ા (જીવન-યાપન) કરતા હૈ ઔર
ભોગ-મોક્ષ કો પાતા હૈ ॥ ૨૨॥

ઇતિ ।

Encoded and proofread by Vandana Visweswariah Rudrapatna vandana.rv gmail.com. NA

*Shri Turiya Shodashi Trailokyavijayakavacham and Stotram*

pdf was typeset on June 8, 2021

Please send corrections to *sanskrit@cheerful.com*